Digitization by eGangotri-South Center

ஸரள ஸம்ஸ்க்ருத சிக்ஷக்

(தமிழ்)

பாகம் நான்கு

ஸம்ஸ்க்ருத விச்வ பரிஷத்தின் தரப்பில்
பாரதீய வித்யா பவனத்தினால் நடத்தப்படும்
பரீக்ஷைப் பிரிவு

ஸம்பாதகர்கள்

ஜயந்த க்ருஷ்ண ஹ.தவே. மா. நியாமகர்,
பா.வி.ப. வேங்கடேச்வர தீக்ஷிதர், ஆசார்யர்,
மு.ஸம்.ப. மஹேச் சந்த்ர சாஸ்த்ரீ,
வித்யாபாஸ்கர், பரீக்ஷாமந்த்ரீ

பாரதீய வித்யா பவன்
சௌபாதி
பம்பாய் - 7

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

வெளியிடுவோர் :
திரு. P.V. சங்கரன்குட்டி
பாரதீய வித்யா பவன்,
சௌபாதி,
பம்பாய் - 7

மறுபதிப்பு : 1000 பிரதிகள் (2006)

விலை : ரூபாய் 30-00

அச்சிட்டோர்
பரமகல்யாண் பிரிண்டர்ஸ்
சென்னை - 4

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

அறிவிப்பு

இப் புத்தகத்தில் முக்யமாக ஸமாஸங்களில் பரிசயம் ஏற்படுத் தப்பட்டிருக்கிறது. ஸம்ஸ்கிருத பாஷையில் ஸமாஸங்களுக்கு முக்ய இடம் உண்டு. ஆகையினால் அவைகளை நன்கு தெரிந்து கொள்ளவேண்டும்.

மற்றும், சப்தங்களையும், (பெயர்சொல்) கிரியா பதங்களை (வினைச்சொல்) யும் நன்கு மனப்பாடம் செய்ய வேண்டும்.

அவ்வாறே இதில் வரும் "ஸுபாஷிதங்களை" யும் மனப் பாடம் செய்தல் வேண்டும்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பொருளடக்கம்

			பக்கம்
1.	हिमालयः (गद्यम्)	....	1
2.	विद्याप्रशंसा (पद्यम्)	....	6
3.	गौः (गद्यम्)	....	9
4.	सामान्यम् (शब्दसङ्ग्रहः)	....	13
5.	समासः (व्याकरणम्)	....	18
6.	नारिकेलः (गद्यम्)	....	22
7.	लङ्कातः यदा हनूमान् प्रतिनिवृत्तः (पद्यम्)	....	24
8.	रामस्य वनगमनम् (गद्यम्)	....	28
9.	समासः (व्याकरणम्)	....	33
10.	संस्कृतं नाम दैवी वाक् (गद्यम्)	....	41
11.	समासः (व्याकरणम्)	....	44
12.	नलदमयन्तीवर्णनम् (पद्यम्)	....	48
13.	किङ्करैः पश्य किं कृतम् (गद्यम्)	....	49
14.	रूपाणि (व्याकरणम्)	....	53
15.	सुभाषितानि (पद्यम्)	....	55
16.	गङ्गा (पद्यम्)	....	58
17.	लोकोक्तयः	....	60
18.	परिशिष्टम्	....	64

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ श्रीः ॥

ஸரள ஸம்ஸ்கிருத சிக்ஷா

[பாகம் 4]

பாடம் 1

॥ हिमालयः ॥

இமயமலை

भारतवर्षे हिमालयो नाम पर्वतः अतीव प्रसिद्धः। येऽन्ये पर्वतास्सन्ति तेषु श्रेष्ठः असौ। अत एव एनं नगाधिराज इति कथयन्ति। अत्युच्चानि शिखराणि नगस्यैतस्य। भारतवर्षस्य उत्तरस्यां दिशि पर्वतोऽसौ तिष्ठति। इत्थं असौ सीमाप्रदेशे रक्षक इव स्थित्वा राष्ट्रं रक्षति।

हिमालयस्य शिखराणि सर्वदैव हिमेनाच्छादितानि भवन्ति। अत एव अस्य अभिधानं "हिमस्य आलयः" इति प्रथितम्। अस्य उत्तुङ्गानि शिखराणि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मघाः आश्रयन्ति । श्रूयते यत्तत्र तपस्विनः निवसन्ति एकाग्रेण चित्तेन च परमेश्वरं ध्यायन्ति च ॥

सुप्रसिद्धः सुविशालश्च मानसं नाम सरोवरः अपि नगस्यास्य अतितुङ्गे शिखरे वर्तते । तस्मिन् सरोवरे राजहंसाः विहरन्ति; विविधानि च कमलानि विकसन्ति । भगवतः शङ्करस्य आवासस्थलमप्यत्रैव आसीत्, यत्र हि भूतगणाः निवसन्ति स्म, तत्स्थानं अद्यावधि भूतस्थानं [भूटान्] इति नाम्ना प्रसिद्धम् । हिमवतः पुत्री पार्वती शङ्करस्य भार्या ।

गङ्गायमुनाब्रह्मपुत्रादीनां नदीनां उद्गमः हिमालयादेव सञ्जातः । नगेऽस्मिन् निबिडानि अरण्यानि सन्ति यत्र हि हिंस्राः पशवः बाहुल्येन दिवापि इतस्ततः अटन्ति । अस्मिन्नेव पर्वते पुरा देवाः गन्धर्वाः यक्षाश्च निवसन्ति स्म इति श्रूयते । अद्यत्वेऽपि श्रीमन्तो जनाः ग्रीष्मावकाशे पर्वतस्यास्योपरि स्थितेषु नगरेषु निवासं कर्तुं प्रतिवर्षं गच्छन्ति । भारतवर्षस्य मूर्ध्नि मुकुट इव शोभते हिमालयः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பதங்கள்

नगः - மலை
हिमम् - பனி
प्रथितम् - பிரஸித்தம்
उत्तुङ्गम् - உயரமான
आश्रयन्ति - அடைகின்றனர்
श्रूयते - கேட்கப்படுகிறது
विहरन्ति - விளையாடுகின்றன
विकसन्ति - மலர்கின்றன
अद्यावधि - இப்பொழுதும்
निबिडानि - நெருக்கமான
दिवापि - பகலிலும்
अटन्ति - திரிகின்றன

சப்தங்கள்

सर्व=எல்லாமான

पुंलिङ्गरूपम्=ஆண்பால் **स्त्रीलिङ्गरूपम्**=பெண்பால்

	ஒருமை	பன்மை	ஒருமை	பன்மை
प्रथमा वि.	सर्वः	सर्वे	सर्वा	सर्वाः
द्वितीया ,,	सर्वम्	सर्वान्	सर्वां	सर्वाः
तृतीया ,,	सर्वेण	सर्वैः	सर्वया	सर्वाभिः
चतुर्थी ,,	सर्वस्मै	सर्वेभ्यः	सर्वस्यै	सर्वाभ्यः
पञ्चमी ,,	सर्वस्मात्	सर्वेभ्यः	सर्वस्याः	सर्वाभ्यः
षष्ठी ,,	सर्वस्य	सर्वेषाम्	सर्वस्याः	सर्वासाम्
सप्तमी ,,	सर्वस्मिन्	सर्वेषु	सर्वस्यां	सर्वासु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नपुंसकलिङ्गम्=பொதுப்பால்

प्रथमा	विभक्तिः	सर्वम्	सर्वाणि
द्वितीया	,,	सर्वम्	सर्वाणि

तृतीयाविभक्தि அதாவது 3-வது வேற்றுமைமுதல் ஏழாவது வேற்றுமைவரை பும்லிங்கத்தில் உள்ள 'ஸர்வ' சப்தத்தைப்போலவே சொல்லவேண்டும்.

'च' कारान्त स्त्रीलिङ्गः वाक् शब्दः

प्रथमा	विभक्तिः	वाक्	वाचः
द्वितीया	,,	वाचम्	वाचः
तृतीया	,,	वाचा	वग्भिः
चतुर्थी	,,	वाचे	वाग्भ्यः
पञ्चमी	,,	वाचः	वाग्भ्यः
षष्ठी	,,	वाचः	वाचाम्
सप्तमी	,,	वाचि	वाक्षु
सम्बोधनम्	,,	हे वाक्	वाचः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

கீழ்க்கண்ட வாக்யங்களை ஸம்ஸ்கிருதத்தில் எழுதுக :—

1. ஸாதுக்களுடைய பேச்சில் இனிமை இருக்கிறது.
2. கிளியின் இனிமையான குரலை எல்லோரும் விரும்புகிறார்கள்.
3. எப்பொழுதும் இனிமையாகப் பேசு.
4. இனிமையாக பேசுதல் மிகவும் சிறந்தது.
5. கடுமையான பேச்சு கலஹத்தை உண்டு பண்ணும்.
6. படிப்பதில் விருப்பம் எல்லோருக்கும் இருக்கிறது.
7. எல்லோருக்கும் சாப்பாடு போடு.
8. அந்த மாணவர்களை இங்கு கூப்பிடு.
9. அந்தப் பெண்கள் எங்கே போனார்கள் ?
10. எல்லோரிலும் சிறந்த பெண் யார் ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 2

॥ विद्याप्रशंसा ॥

கல்வியின் மேன்மை

(१) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

(२) अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥

(३) सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वात् अनर्घ्यत्वात् अक्षय्यत्वाच्च सर्वदा ॥

(४) हर्तुर्नगोचरं याति दत्ता भवति विस्तृता ।
कल्पान्तेऽपि न या नश्येत् किमन्यद्विद्यया समम्॥

(५) ज्ञातिभिः ह्रियते नैव चोरेणापि न नीयते ।
दाने नैव क्षयं याति विद्यारत्नं महाधनम् ॥

(६) विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाऽऽद्रियते सदा ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(७) न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥

(८) मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या ॥

(९) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोग-करी यशः सुखकरी विद्या गुरूणां
गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः
पशुः ॥

(१०) सद्विद्या यदि का चिन्ता वराकोदरपूरणे ।
शुकोऽप्यशनमाप्नोति रामरामेति च ब्रुवन् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பதங்கள்

अपूर्वः - புதியது

कोशः - நிதி

व्ययतः - செலவினுல்

उच्छेदि - தகர்ப்பது

अर्थस्य - பொருளுடைய, தனத்திற்கு

लोचनम् - கண் [மையான

अनुत्तमम् - ரொம்பவும் மேன்

आहुः - சொல்லுகிருர்கன்.

अहार्य - கொள்ள அடிக்கத் தகாதது.

अनर्घ्य - விலை மதிக்க முடியாத

हर्तुः - அபஹரிப்பவனுக்கு

हार्यते - கொண்டு செல்லப்படுகிறது.

प्रतिपत्तये - நன்கு அறிவதின் பொருட்டு

तनोति - செய்கிறது.

वितनोति - பரப்புகிறது,

वराकः - வருந்தத்தக்கவன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 3

गौः—पशु

इयं गौः। एषा मङ्गलदर्शना। इयं प्रकृत्या आकारेण च परमा साध्वी। अस्याः लम्बं पुच्छम्; सरलं शृङ्गयुगलम्; शिथिलं कर्णद्वयम् च साधुतां परिचाययन्ति।

गावः विविधवर्णाः भवन्ति। ताः श्यामाः, गौर्यः, धवलाः, धूसराश्च। एताः भारतात् बहिः जापान् चीन-अमेरिका प्रभृति देशेष्वपि सन्ति। गौः घासम्, धान्यं च भक्षयति। एषा अल्पचर्वितं खाद्यं निगिलति, पुनः रोमन्थं वर्तयति।

इयं धात्री अस्माकम्। एषा अस्मभ्यं दुग्धं ददाति। अस्याः दुग्धेनैव शिशवः जीवन्ति। दुग्धात् दधि भवति; दध्नः तक्रम्; तस्मात् नवनीतम्; ततश्च घृतम्। घृतेन बहूनि मिष्टान्नानि पक्वान्नानि च प्रसाध्यन्ते। अस्याः दुग्धं पथ्यं भवति। शिशूनां रोगिणां च कृते इदमेव दीयते पातुम्। इयं बलीवर्दानां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जननी ; ये हि हलेन अस्माकं क्षेत्राणि कृष्ट्वा धान्यं उत्पादयन्ति ; येन वयं जीवामः । पुरा गोधनं जनानां मुख्यं धनमासीत् । तदा जनाः सुखिनः, बलवन्तः वीराश्च अभवन् ।

गौः अस्माभिः माता इव पूजनीया ; देवता इव दर्शनीया ; दीना इव दयनीया ; निधिः इव रक्षणीया च अस्ति ।

अस्माकं राष्ट्रपतयः इदानीं गोपालनार्थं, तासां संवर्धनार्थं च तत्र तत्र गोशालाः निर्मास्यन्तीति शुभः वृत्तान्तः श्रूयते । पुरा भगवता श्रीकृष्णेन गोव्रजं रक्षता गवां पोषणस्य कर्तव्यता प्रख्यापिता । तदनुसारेण सर्वैरपि भारतवासिभिः गवां परिपालनं कर्तव्यम् । ता हि गावः ;

"भुक्त्वा तृणानि शुष्काणि पीत्वा तोयं जलाशयात् ।
दुग्धं ददति लोकेभ्यः गावो लोकस्य मातरः ॥"

(बालसंस्कृतम्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பதங்கள்

परिचाययति - அறிமுகப் படுத்துகிறது

धूसर - சாம்பல் நிறமான

पुच्छम् - வால்

चर्वितम् - மென்று விழுங்குதல்

रोमन्थम् - அசை போடுதல்

धात्री - தாதி

प्रसाध्यन्ते - நன்கு செய்யப் படுகின்றன.

निर्मास्यन्ति - ஏற்படுத்துவார்கள்.

प्रख्यापिता - நன்கு தெரிவிக்கப் பட்டது.

கீழ்க்கண்ட வாக்யங்களை ஸம்ஸ்கிருதத்தில் எழுதவும்:—

1. நான் பசுவின் பாலைக் குடிக்கிறேன்.
2. என் தம்பியும், பசுவின் பாலைக் குடிக்கிறான்.
3. என்னுடைய பசு கருப்பானது.
4. பசுவின் கன்று சிகப்பு நிறம்.
5. அது வேகமாக ஓடுகிறது.
6. பசு புல்லைத் தின்கிறது.
7. காலையில் மாட்டுக்காரன் அதை காட்டிற்கு ஓட்டிச் செல்கிறான்.
8. மாலையில் அது வீட்டிற்கு திரும்புகிறது.
9. அதைப் பார்த்து எல்லோரும் சந்தோஷிக்கிறார்கள்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ ओकारान्त स्त्रीलिङ्गः 'गो' शब्दः ॥

एकवचनं	बहुवचनं	विभक्तिः
गौः	गावः	प्रथमा
गां	गाः	द्वितीया
गवा	गोभिः	तृतीया
गवे	गोभ्यः	चतुर्थी
गोः	गोभ्यः	पञ्चमी
गोः	गवाम्	षष्ठी
गवि	गोषु	सप्तमी
हे गौः	गावः	संबोधनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 4.

॥ सामान्यम् ॥

பதங்கள்.

अकाण्डे - திடீரென்று,
अजिनम् - மான் தோல்
अनवरतम् - எப்பொழுதும்,
अनादृत्य - பொருட்படுத்தாமல்
अन्येद्युः - மற்றொரு நாள்.
अभीप्सुः - விருப்பமுள்ளவன்
अभ्यागतः - விருந்தாளி
अम्बरम् - ஆகாசம், வஸ்திரம்
अरिः - விரோதி
अर्दित - பீடிக்கப்பட்ட
अवदात - சுத்தமான, வெண்மையான
अवनिः - பூமி
अहमहमिका - நான் முன்பு நான் முன்பு என்ற
आखुः - எலி
अरातिः - சத்ரு
आविल - கலங்கின
उपकरणम् - ஸாதநம்.
उपलः - கல்
उपान्तः - எல்லை,
ऊर्मिः - அலை
ओघः - கூட்டம், பிரவாஹம்.
कर्हिचित् - ஒரு சமயம்
कारागारम् - ஜெயில், சிறை
कासारः - ஏரி

கீழ்க் கண்ட வாக்யங்களை தமிழாக்கவும் :—

(१) अजिने उपविश्य ऋषयः सन्ध्यावन्दनादिकं कुर्वन्ति ।

(२) तस्मिन् गृहे बहवः मूषकाः सन्ति ।

(३) तस्मिन् कूपे आविलं जलं वर्तते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(४) बालकाः कासारे उपलान् क्षिपन्ति ।

(५) नद्याः ओघे नौकाः गच्छन्ति ।

(६) चोरा एव कारागाराय गच्छन्ति ।

(७) कासारतटे स्थित्वा जलस्य ऊर्मिं पश्यति ।

(८) अन्येद्युः वयं ग्रामं गमिष्यामः ।

(९) अनवरतं वायुः वाति ।

(१०) हिमालये हिमपातः अनवरतं भवति ।

(११) अरातिषु विश्वासो नैव कर्तव्यः ।

(१२) अवदातं सुवर्णं पश्य ।

(१३) स ज्वरेणार्दितः आसीत् ।

(१४) अरयः युद्धक्षेत्रे युद्धं कुर्वन्ति ।

(१५) अम्बरे सूर्यः प्रकाशते ।

(१६) अभ्यागतः यदि कश्चिदागच्छेत् तर्हि तस्मै भोजनं दद्यात् ।

(१७) मम समीपे बहूनि लेखनस्योपकरणानि सन्ति ।

(१८) बालकाः अहमहमिकया क्रीडितुं गच्छन्ति ।

(१९) साधवो न भवन्ति धनस्याभीप्सवः ।

(२०) मित्रं आनाद्दत्य न सुखं प्राप्नोति कोऽपि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ஸம்ஸ்கிருதத்தில் மொழி பெயர்க்கவும் :—

1. அரசன் பூமியை காப்பாற்றுகிறான்.
2. அவன் முற்றத்தில் தண்ணீரைக் கொட்டுகிறான்.
3. நீ ஏன் அழுகிறாய் ?
4. தாரா பாட்டு பாடுகிறாள்.
5. ராமன் சாப்பிடுவதில்லை.
6. மரத்தில் இலைகள் அசைகின்றன.
7. நான் ஏழைகளைக் காப்பாற்றுகிறேன்.
8. ஸாதுக்கள் யாரிடமும் பொறுமைப் படுவ்தில்லை.
9. உபாத்யாயர் பரீக்ஷையின் முடிவை வெளியிடுகிறார்.
10. நான் கடவுளை நினைக்கிறேன்.

கீழ்க் கண்ட வாக்யங்களை தக்க வினைச்சொல் கொண்டு, பூர்த்தி செய்க :—

(१) धनिकाः धनं ——— ।

(२) राजानः अवनीं ——— ।

(३) राजनीतिविषये ते परस्परं ——— ।

(४) मुनिः प्रतिदिनं परमेश्वरं ——— ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(५) कन्यका सुमधुरं गानं ——— ।

(६) तस्मात् भग्नपात्रात् जलं ——— ।

(७) मालाकारः पुष्पवाटिकायां जलं ——— ।

(८) वायुना पत्राणि ——— ।

(९) दुःखिता सा तत्र किमर्थं ——— ।

(१०) भोजनगृहे ब्राह्मणः ——— ।

கோடிட்ட இடங்களை தக்க பதங்கள் கொண்டு பூர்த்தி செய் :—

(१) सः तस्मिन् कार्यालये गत्वा स्वात्मानं ——— ।

(२) सा ——— रोमन्थं ——— ।

(३) केन ——— पत्रं तत्र ——— ।

(४) प्रसाध्यन्ते अनेके पदार्थाः ——— ।

(५) गवां ——— भारते ——— ।

(६) गावः ——— अरण्ये ——— गच्छन्ति ।

(७) गौः ——— अतीव ——— भवति ।

(८) गौः ——— तृणं ——— ।

(९) त्वं ——— भुक्त्वा क्व ——— ।

(१०) न वयं ——— तत्र गत्वा ——— ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

கீழ்ள்ள பதங்களை உபயோகித்து வாக்யம் எழுதுக :—

१. गवे । २. गमिष्यामि । ३. अर्जिष्यसि ।

४. ओघः । ५. अभीप्सुः । ६. अरीणाम् ।

७. कासारे । ८. कारागारम् । ९. अम्बरे ।

१०. अर्दिता ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 5.

समासः

I. இரண்டு அல்லது அதற்கு மேற்பட்ட பதங்களை ஒன்றுகச் சேர்த்து, ஏற்படுத்தப்பட்ட 'பதக்கோர்வை' ஸமாஸம் எனப்படுகிறது.

II. பதங்களை சேர்க்கும்பொழுது அவைகளுக்கு இடையில் உள்ள வேற்றுமை உருபு மறைந்து விடுகிறது. (இதற்கு "லோபம் என்று பெயர்).

III. ஒற்றுமை உள்ள இரண்டு அல்லது மேற்பட்ட பதங்களுடைய சேர்க்கையில் ஸமாஸம் உண்டாகிறது. ஒன்றுக்கொன்று தொடர்பற்ற பதங்களின் சேர்க்கையினல் ஸமாஸம் ஏற்படுவதில்லை.

IV. ஸமாஸம் ஆறுவகைப்படும் அவையாவன:-

१. तत्पुरुषसमासः २. कर्मधारयसमासः ३. बहुव्रीहि समासः ४. द्वन्द्वसमासः ५. द्विगुसमासः ६. अव्ययीभाव समासः ॥

V. ஸம்ஸ்கிருத பாஷையில் ஸமாஸங்களை உபயோகிப்பது அதிகமாகக் காணப்படுகிறது. சுலபமாக எழுதவோ, பேசவோ இதனல் முடிகிறது.

உதாஹரணமாக, **गुडेन मिश्रः** (வெல்லம் கலந்த) என்ற பதங்களுடைய ஸமாஸத்தை **गुडमिश्रः** என்று சொல்லும்பொழுது ஸுலபமாக இருப்பதைக் காண்கிறோம். **पीताम्बरः** (மஞ்சள் வஸ்திரத்தை தரித்தவன்)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

என்ற பதம் பிரித்துச் சொல்லும்பொழுது **पीतं अम्बरं यस्य सः** (எவனுடைய வஸ்திரம் மஞ்சளாக இருக்கிறதோ, அவன்) என்று விரிவடைகிறதைத் தவிர்ப்பதற்காகவே, 'ஸமாஸங்களைக்' கையாளுதல் ஸம்ஸ்கிருதத்தில் அதிகம்.

तत्पुरुषसमासः

I. கடைசிப் பதத்தை முக்யமாகக் கொண்ட ஸமாஸம் தத்புருஷ ஸமாஸம் எனப்படுவது.

II. முதல் வேற்றுமையிலிருந்து ஏழாவது வேற்றுமைவரை உள்ள எல்லா வேற்றுமையிலும் தத்புருஷ ஸமாஸம் ஏற்படுகிறது.

III. தத்புருஷ ஸமாஸம் முக்யமாக ஏழுவகைப் படடது.

1. द्वितीया तत्पुरुषः 2. तृतीया तत्पुरुषः 3. चतुर्थी तत्पुरुषः 4. पञ्चमी तत्पुरुषः 5. षष्ठी तत्पुरुषः 6. सप्तमी तत्पुरुषः 7. नञ् तत्पुरुषः ॥

(1) **द्वितीया तत्पुरुषः** = உதாஹரணம்.

1. **ग्रामं + गतः = ग्रामगतः**- (கிருமத்தை அடைந்தவன்)

2. **पुण्यं + श्रितः = पुण्यश्रितः**- (நல்ல காரியத்தைக் கொண்டவன்)

(2) **तृतीया तत्पुरुषः** = உதாஹரணம்.

1. **तेन + सदृशः = तत्सदृशः**- (அவனுக்குச் சமமான்வன்)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. सर्पेण + दष्टः = सर्पदष्टः- (பாம்பினால் கடிக்கப்பட்டவன்)

3. चोरेण + अनुद्रुतः = चोरानुद्रुतः- (திருடனால் துரத்தப்பட்டவன்)

(3) चतुर्थी तत्पुरुषः = உதாஹரணம்.

1. भूतेभ्यः + बलिः = भूतबलिः- (பூதங்களுக்காக ஏற்பட்ட பலி)

2. प्रजायै + हितम् = प्रजाहितम् (ஜனங்களுக்கான நன்மை)

(4) पञ्चमी तत्पुरुषः = உதாஹரணம்.

1. चोरात् + भयम् = चोरभयम् - (திருடனிடம் இருந்து பயம்)

2. पापात् + मुक्तः = पापमुक्तः - (பாபத்திலிருந்து விடுபட்டவன்)

3. स्वर्गात् + च्युतः = स्वर्गच्युतः - (ஸ்வர்கத்தில் இருந்து நழுவினவன்)

(5) षष्ठी तत्पुरुषः = உதாஹரணம்.

1. राज्ञः + पुरुषः = राजपुरुषः (அரசனைச் சார்ந்தவன்)

2. भुवः + पतिः = भूपतिः-(அரசன், பூமியின்பர்தா)

3. वृक्षस्य+मूलम् = वृक्षमूलम्-(மரத்தினுடைய அடி)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(6) सप्तमी तत्पुरुषः = உதாஹரணம்.

1. विद्यायाम् + प्रवीणः = विद्याप्रवीणः-(கல்வியில் சிறந்தவன்)

2. कलासु + कुशलः = कलाकुशलः-(கலைகளில் கெட்டிக்காரன்)

3. शास्त्रेषु + निपुणः = शास्त्रनिपुणः-(சாஸ்திரங்களில் தேர்ச்சிப்பெற்றவன்)

(7) नञ् तत्पुरुषः = உதாஹாணம்.

न + पण्डितः = अपण्डितः-(பண்டிதன் அல்லாதவன்)

न + कृष्णः = अकृष्णः-(கறுப்பு நிறமற்றவன்)

न + शक्तः = अशक्तः-(சக்தியற்றவன்)

இரண்டு அல்லது மேற்பட்ட பதங்களின் சேற்கையை ஸமாஸம் என்று சொன்னேம். இந்தப்பதங்களைப் பிரித்துக்காட்டும் வாக்யத்தை விக்ரஹ வாக்யம் என்பதாக சொல்வது. 'ஸமாஸம்' என்பதற்கு சேர்த்தல் என்றும், 'விக்ரஹம்' என்பதற்கு பிரித்தல் என்றும் பொருள்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 6

नारीकेलः

தேங்காங்

कोऽयं वृक्षः ? अयं नारिकेलस्य वृक्षः । एष सरलः महोच्छ्रायश्च । आम्रवृक्षस्येव अस्य शाखाः न सन्ति । अस्य शिखरे पत्राणां गुच्छो भवति । कदली-वृक्षस्यापि शाखाः न भवन्ति । परन्तु नायं ताल इव महोत्तुङ्गः ।

नारिकेलस्य पत्राणां परिणाहं पश्यत । न कश्चिदन्यो वृक्षः ईदृशानि बृहन्ति दलानि दधाति । वृक्षराजोऽयं छदानां छत्रमिव शिरसि बिभर्ति । दलानामधस्तात् अस्य फलानि लम्बानि सन्ति । तानि कानिचित् लघूनि, कानिचित् पृथूनि, कानिचित् हरितानि अन्यानि च कपिशवर्णानि सन्ति । फलानी-मानि मधुरेण पयसा पूरितानि सन्ति ।

वयं बहुधा नारिकेलस्य पयः पिबामः । इदं दीपनं पाचनं च भवति । इदमेव पयः परिपाकं गच्छत् दुग्धधनं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जायते। तच्च परिपच्य वर्तुलाकारं बीजं निर्माति। तद्बीजं नारिकेलगर्भः कथ्यते वयं पक्वं तद्गर्भं खादामः। इदं सुस्वादु, मधुरम्, स्निग्धम्, पुष्टिकरं च भवति।

अनेन बहूनि मिष्टान्नानि क्रियन्ते। एतस्मात्तैलं निर्माय केशेषु दीयते। नारिकेलस्य सर्वाङ्गः मनुष्याणां उपभोगाय भवति। अस्य काष्ठं इन्धनाय, पत्राणि व्यजनाय, त्वक् रज्जुकरणाय, कपालं पानपात्राय, पयः पानाय, गर्भश्च भक्षणाय भवति।

अयं सज्जनः पुरुष इव सदैव मधुरान्तरः लोकानुपकरोतीत्यलमस्य प्रशंसायै। इदमत्रोच्यते—

नारिकेलफलाकाराः सज्जनाः सन्ति भूतले।
अन्ये बदरिकाकाराः बहिरेव मनोहराः॥

(बालसंस्कृतम्)

पदங்கள்

नारिकेलः - தேங்காய், (தென்னை)
महोच्छ्राय, - மிக உயரம்
गुच्छः - கொத்து
उत्तुङ्ग - உயரமான
परिणाहः - விஸ்தாரம்
दलानि - இதழ்கள்
छदानाम् - இலைகளுடைய
परिपच्य - பக்குவமாகி
बदरिकाः - இலந்தை

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 7

॥ लङ्घातः यदा हनुमान् प्रतिनिवृत्तः ॥

(१) श्रुत्वा हनूमतो वाक्यं यथावदनुभाषितम् ।
रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥

(२) कृतं हनुमता कार्यं सुमहत् भुवि दुष्करम् ।
मनसापि यदन्येन न शक्यं धरणीतले ॥

(३) देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
अप्रधृष्यां पुरीं लङ्कां रावणेन सुरक्षिताम् ॥

(४) यो वीर्यबलसंपन्नो द्विषद्भिरनिवारितः ।
प्रविष्टः सत्वमाश्रित्य श्वसन् को नाम निष्क्रमेत् ॥

(५) भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत् ।
एवं विधाय स्वबलं सदृशं विक्रमस्य च ॥

(६) यो हि भृत्यो नियुक्तः सन् भर्त्रा कर्मणि दुष्करे ।
कुर्यात्तदनुरागेण तमाहुः पुरुषोत्तमम् ॥

(७) तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता ।
न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(८) अहं च रघुवंशश्च लक्ष्मणश्च महाबलः ।
वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥

(९) इदं तु ममं दीनस्य मनो भूयः प्रकर्षति ।
यदि हास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥

(१०) एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः ।
मया कालमिमं प्राप्य दत्तश्चास्तु महात्मनः ॥

(११) इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे ।
हनूमन्तं महात्मानं कृतकार्यमुपागतम् ॥

(१२) ध्यात्वा पुनरुवाचेदं वचनं रघुसत्तमः ।
हरीणामीश्वरस्यैव सुग्रीवस्योपशृण्वतः ॥

(१३) "सर्वथा सुकृतं तावत् सीतायाः परिमार्गणम् ।
सागरं तु समासाद्य भूयो नष्टं मनो मम ॥

(१४) कथं नाम समुद्रस्य दुष्पारस्य महाम्भसः ।
हरयो दक्षिणं पारं गमिष्यन्ति समाहिताः" ॥

(१५) इत्युक्त्वा शोकसंभ्रान्तो रामः शत्रुनिबर्हणः ।
हनुमन्तं महाबाहुः ततो ध्यानमुपागमत् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(१६) तं तु शोकपरिद्यूनं रामं दशरथात्मजम् ।
उवाच वचनं श्रीमान् सुग्रीवः शोकनाशनम् ॥

(१७) किं त्वं सन्तप्यसे वीर ! यथान्यः प्राकृतस्तथा ।
मैवं भूः त्यज सन्तापं कृतघ्न इव सौहृदम् ॥

(१८) सन्तापस्य च ते स्थानं नहि पश्यामि राघव ।
प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥

(१९) मतिमान् शास्त्रवित् प्राज्ञः पण्डितश्चासि राघव ।
त्यजेमां प्राकृतां बुद्धिं कृतात्मेवाऽऽत्मदूषणीम् ॥

(२०) समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम् ।
लङ्कामारोहयिष्यामो हनिष्यामश्च रावणम् ॥

(२१) इमे शूराः समर्थाश्च सर्वे नो हरियूथपाः ।
त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ॥

(२२) सेतुर्बद्धः समुद्रे च यावल्लङ्कासमीपतः ।
सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय ॥

(२३) त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः ।
मद्बुद्धैः सचिवैः सार्धं अरिं जेतुमिहार्हसि ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(२४) न हि पश्याम्यहं कञ्चित् त्रिषु लोकेषु राघव ।
गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥

(२५) तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते ।
लङ्घनार्थं च घोरस्य समुद्रस्य न दीपतेः ॥

பதங்கள்

सुमहत् - பெரிய
धरणीतले - பூப்ரதேசத்தில்
अप्रधृष्याम् - தகர்க்கமுடியாத
द्विषद्भिः - சத்ருக்களினுல்
निष्क्रमेत् - வெளிக்கிளம்புவான்
नियोगे - உத்திரவில்
तोषितः - சந்தோஷமடைந்தவன்
परिष्वङ्गः - ஆலிங்கனம்
परिषस्वजे - தழுவிக்கொண்டான்
हरीणाम् - குரங்குகளுக்கு
परिमार्गणम् - தேடுதல்
महाम्भसः - பெரிய சமுத்திரத்தினுடைய
शत्रुनिबर्हणः - சத்ருவை அடுக்குவதில் சூரன்
उपागमत् - வந்துசேர்ந்தான்
शोकपरिप्लुतम् - சோகத்தினுல் மலிந்த
प्राकृतः - ஸாதாரணமனிதன்
निलयम् - ஸ்தானம், வீடு
यूथपाः - போர்த்தலைவர்கள்
पाकम् - அக்னியை
उपधारय - தெரிந்து கொள்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 8

रामवनगमनम्

एवं पितुः दशरथस्य आदेशपालने तत्परं तं रामं समीक्ष्य दुःखार्द्रनयना कौसल्या अब्रवीत्, पुत्र! गच्छ त्वं एकाग्रेण मनसा। ते भद्रं भवतु। त्वां अभिरक्षतु स एव धर्मः यं त्वं परिपालयसि। धर्मेण सत्येन चाभिरक्षितः त्वं चिरं जीव इति।

धर्मनिरतः कौसल्यानन्दनः रामः पुनः मातरं अभिवाद्य सीतानिलयमगच्छत्। तत्र तत् सर्वं अजानती वैदेही भर्तुः यौवराज्याभिषेचनं प्रतीक्षमाणा स्वनिलये तस्थौ। अस्मिन्नेवावसरे शोकसन्तप्ते पत्यौ प्रविष्टे प्रवेपमाना सा सीता सहसा उदपतत्।

तां तथावस्थितां सीतां विलोक्य धर्मात्मा रामः स्वकीयं मनोगतं शोकं सोढुं न शशाक। तदानीं तु सशोकः विवृततां गतः।

सर्वमेतदवलोक्य दुःखोद्विग्नमना सा सीता राममपृच्छत्—प्रभो! किमिदं? केन कारणेन इत्थं त्वं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विपरीतो दृश्यसे ? कस्मात् तवोपरि राजछत्रं न विराजते ? अहो अपूर्वश्च तव मुखवर्णः ।

इत्थं विलपन्तीं तां जनकतनयां राघवः प्रोवाच प्रिये ! मां तत्रभवान् तातः प्रव्राजयति । तस्मात् कारणात् मया चतुर्दशवर्षाणि अरण्ये वस्तव्यम् । सोऽहं निर्जनं तं वनं प्रस्थितः त्वां द्रष्टुं इदानीं अहं आगतोऽस्मि ॥

एवमुक्ता तु वैदेही उवाच—आर्यपुत्र ! यदि त्वं दुर्गमं वनं प्रस्थितः तर्हि अहमपि ते अग्रतो गमिष्यामि यतः नारीणां पतिरेक एवेह सदागतिः । त्वया वियुक्ताहं मरणे निश्चितास्मि । तदा धर्मात्मा रामः तां सीतां सान्त्वयित्वा उवाच—सीते ! त्वं कुलीना धर्मनिरता च असि ; अतः त्वमिहैव स्वधर्मं समाचर ; येन मम मनसि सुखं भवेत् । वनगमनं दुःसहं ते । तत्र सिंहानाम्, व्यघ्राणां च दुःखदाः निनदाः, सरितः सग्राहाः, मत्ताः गजाः, कण्टकिताः लताश्च । मार्गा अपि निरुपाः सुदुःखाश्च । सर्वं चैतत् श्रुत्वा दुःखिता सीता राममेवमुवाच—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वने यानि दुःखानि सम्भवन्ति तानि त्वयि स्नेहयुक्तायाः मम सुखायैव भवन्तीति विद्धि। यतः त्वद्वियोगेन मया जीवितं त्यक्तव्यमेव, अतः त्वया सह ममापि वनगमनं उचितमेव ॥

एवमुक्त्वा तु सह रामेण वनं जगाम।

பதங்கள்

आदेशः, निदेशः - கட்டளை
भद्रम् - மங்களம்
अभिरक्षतु - நன்கு காப்பாற்றட்டும்.
निरतः - ஈடுபட்டவன்.
अभिवाद्य - வணங்கி
निलयः - இருப்பிடம்
दुर्मनाः - வருத்தமடைந்த
तातः - தகப்பன்
इह - இங்கு
सान्त्वयित्वा - ஆச்வாஸம்
विद्धि - அறிவாயாக [செயது
जगाम - சென்றான்.
प्रतीक्षमाणा - எதிர்பார்த்தவளாக
वेपमाना - நடுக்கமுற்றவளாக
उदपतत् - எழுந்து நின்றாள்
सोढुम् - பொறுப்பதற்கு
शशाक - முடியும்
विवृतताम् - விஸ்தாரமாக ஆகுதலை
तत्रभवान् - பூஜ்யரான
प्रव्राजयति - வெளியே அனுப்புகிறார்.
प्रेत्य - அடைந்து, பரலோகம் சென்று
निरपाः - ஜலமில்லாத
जीवितम् - உயிரை
कण्टकिता - முள்ளினால் ஆக்கப்பட்ட

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

கீழ்க்கண்ட வாக்யங்களை ஸம்ஸ்கிருதத்தில் எழுதவும் :—

1. சத்ருவை ஒரு பொழுதும் சக்தியற்றவனாக நினைக்காதே.
2. அப்பொழுது அவன் வெகுதூரம் சென்று விட்டான்.
3. அந்த ஜலமில்லாத இடத்திற்கு ஏன் செல்லுகிறாய் ?
4. அந்த இடத்தில் குளம் ஜலமற்றதாக இருக்கிறது.
5. அந்தக்கொடிகள் முள் நிறைந்தவளாக இல்லை.
6. தன் உயிரைக் காப்பாற்றுவதில் மிகவும் அவசியம்.
7. நல்லவர்கள் உயிரைவிட்டாவது புகழை அடைகிறார்கள்.
8. குளிரினால் நடுங்கிக்கொண்டு ஏன் அந்தக் கிழவி நிற்கிறாள் ?
9. நான் அவனுக்கு உதவி செய்வதற்கு சக்தியுள்ளவனாக இல்லை.
10. கடவுள் அவனைக் காப்பாற்றட்டும்.
11. உனக்கு நன்மை உண்டாகட்டும்.
12. இந்த உலகத்தில் யார் சுகத்தை அடைகிறார்கள்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

13. நான் அம்மாவை வணங்கிவிட்டு வருகிறேன்.

14. நீ அவனை ஸமாதானம் செய்து வீட்டிற்கு அழைத்துச்செல்.

15. நான் துக்கத்தைத் தாங்குவதற்கு சக்தியற்றவனாக இருக்கிறேன்.

அடியிற்கண்ட கேள்விகளுக்கு ஸம்ஸ்க்ருதத்தில் விடையளிக்கவும்:—

(१) दुःखार्द्रमनाः कौसल्या पुत्रं रामं किमब्रवीत् ?

(२) मातरं प्रणम्य रामः कुत्र जगाम ?

(३) सीता भर्तारं रामं किमपृच्छत् ?

(४) दुःखितां सीतां रामचन्द्रः कथं सान्त्वयामास ?

(५) वैदेही रामेण सार्धं वनगमनाय किमर्थमैच्छत् ?

ஸீதை, இராமன் இவர்களுள் நடந்த ஸம்பாஷணையை சுருக்கமாக ஸம்ஸ்கிருதத்தில் எழுதுக.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 9

॥ कर्मधारयसमासः ॥

ஸமாஸம்

1. கர்மதாரயம் என்கிற இந்த ஸமாஸம் தத் புருஷ ஸமாஸத்தின் ஒரு பிரிவே.
2. இந்த ஸமாஸத்தினுடைய இரண்டு பதங்கள் ஒரேவேற்றுமையில், அதாவது முதல் வேற் றுமையில் வரும்.
3. இந்த ஸமாஸத்திலும் கடைசி பதம் தான் முக்யமாக இருக்கும்.
4. ஸாதாரணமாகப் பெயர்ச்சொல்லும், பெயர் உரிச்சொல்லும் சேர்ந்துதான் கர்மதாரய ஸமாஸமாகிறது. இந்த ஸமாஸம் ஏழு வகைப்பட்டது.

இந்த ஸமாஸம் ஏழுவகைப்படும் அவை :—

1. विशेषणपूर्वपद कर्मधारयसमासः
2. विशेष्यपूर्वपद ,,
3. विशेषणोभयपद ,,
4. उपमानपूर्वपद ,,
5. उपमानोत्तरपद ,,
6. सम्भावनापूर्वपद ,,
7. अवधारणापूर्वपद ,,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(1) विशेषणपूर्वपदकर्मधारयः

உதாஹரணம் :

1. नीलोत्पलम् = नील + उत्पलम् (नीलं च तत् उत्पलं च)-கருநெய்தல் புஷ்பம்.

2. कृष्णमेघः = कृष्णः + मेघः (कृष्णश्चासौ मेघश्च)-கார்மேகம்.

3. शीतोदकम् = शीतं + उदकम् (शीतं च तत् उदकं च)-குளிர்ந்த ஜலம்.

4. पीतवस्त्रम् = पीतं + वस्त्रम् (पीतं च तत् वस्त्रं च)-மஞ்சள் வஸ்த்திரம்.

இதன் முதல் பதம் பெயர் உரிச் சொல் ஆகையால் இது விசேஷண பூர்வபதம் எனப்படும்.

(2) विशेष्यपूर्वपदकर्मधारयः

உதாஹரணம் :—

1. नराधमः = अधमः + नरः (नरश्चासौ अधमश्च) - கீழ்த்தர மனிதன்.

2. नरोत्तमः = उत्तमः + नरः (नरश्चासौ उत्तमश्च) - உயர்ந்த மனிதன்.

மேற்கண்ட உதாஹரணங்களில் முதல் பதம் பெயர்ச்சொல். ஆகையால் இது விசேஷயபூர்வபதம் எனப்படுகிறது.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(3) विशेषणोभयपदकर्मधारयः

உதாஹரணம்: —

1. शीतोष्णम् = शीतं + उष्णम् (शीतं च तत् उष्णं च)- குளிரானதும் உஷ்ணமானதுமான.

2. शुक्लकृष्णः = शुक्लः + कृष्णः (शुक्लश्चासौ कृष्णश्च) - வெளுப்பாகவும் கறுப்பாகவுமிருக்கிற

மேற்கண்ட உதாஹரணங்களில் இரண்டு பதங்களும் பெயர் உரிச்சொல்கள். ஆகையால் இது விசேஷணோபய பதம் எனப்படும்.

(4) उपमानपूर्वपदकर्मधारयः

உதாஹரணம் :

1. मेघश्यामः = मेघ इव श्यामः - மேகம் போல் கறுத்த

2. पयोधवलम् = पयः इव धवलम् - பால்போல் மெண்மையான.

3. कर्पूरगौरः = कर्पूरः इव गौरः - கற்பூரம் போல் வெண்மையான.

இதில் முதல்பதம் உபமானத்தைக் குறிக்கிறது, ஆகையால் இது உபமான பூர்வபதம் எனப்பட்டது.

குறிப்பு :—மேகம் போல் கறுத்த என்ற சொல்லில் மேகம் உபமானம். அதாவது எதற்கு ஒப்பாகக் கூறுகிறோமோ அது உபமானம் எனப்படுவது.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(5) उपमानोत्तरपदकर्मधारयः

உதாஹரணம்: —

1. **राजेन्दुः** = **राजा इन्दुः इव** - சந்திரனைப்போன்ற அரசன்.

2. **पुरुषव्याघ्र इव** = **पुरुषः व्याघ्र इव**-புலியைப்போன்ற மனிதன்.

மேற்கண்டவற்றில் **राजा, पुरुष** போன்ற சொற்களை வேறு வஸ்துவுடன் ஒப்பிடுகிறோம். ஆகையால் **इन्दु, व्याघ्र** என்ற உபமான பதங்கள் கடைசியிலிருப்பதால் இது உபமான உத்தரபதம் எனப்படுகிறது.

(6) सम्भावनापूर्वपदकर्मधारयः

உதாஹரணம் :—

चोरबुद्धिः = **चोर इति बुद्धिः**- திருடன் என்ற நினைப்பு (ஸம்பாவனை).

இதில் **सम्भावना** (ஊஹம்) செய்யப்படும் சொல் முதலில் இருப்பதால் **सम्भावनापूर्वपदकर्मधारयसमासः** என இதற்குப் பெயர்.

(7) अवधारणापूर्वपदकर्मधारयः

உதாஹரணம் :—

1. **तपोधनम्** = **तप एव धनम्** - தபஸ் சொத்து

2. **राजर्षिः** = **राजा एव ऋषिः** அரசனே ரிஷி.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

அவதாரணம் என்பது "அதுவேதான்"; "அதைத் தவிர வேறல்ல" என்ற தீர்மானம். மேற்கண்ட உதாஹரணங்களில் தபஸ்ஸே சொத்து, 'அரசனே ரிஷி' என்று முதல் பதத்தில் அவதாரணம் தெளிவாகயிருப்பதால் இது **अवधारणापूर्वपदकर्मधारयसमासः** என்று வழங்குகிறது.

॥ बहुव्रीहि समासः ॥

இந்த ஸமாஸத்தில் இரண்டு பதங்கள், முதல் வேற்றுமையிலிருந்து கொண்டு, இந்த பதங்களின் அர்த்தத்தைத் தவிர, வேறு ஒரு அர்த்தத்தை முக்யமாகக் கொண்டவையாக இருக்கும், உதாஹரணமாக **पीताम्बरः** என்ற ஸமாஸத்தில் **पीतं अम्बरं** என்ற சொற்கள், தனித்தனியே மஞ்சளான, வஸ்த்ரம் என்ற அர்த்தத்தைச் சொல்லுகின்றன. ஆனல் ஸமாஸச்சொல்லின் அர்த்தம், மஞ்சள் வஸ்திரத்தை உடையவன் என்று ஆகிறது. இதற்கு முக்யமாக பத்து பிரிவுகள் உண்டு. அவை :—

१.	द्वितीया बहुव्रीहिः	६.	सप्तमी बहुव्रीहिः
२.	तृतीया ,,	७.	संख्योभयपद ,,
३.	चतुर्थी ,,	८.	सहपूर्वपद ,,
४.	पञ्चमी ,,	९.	व्यतिहारलक्षण ,,
५.	षष्ठी ,,	१०.	दिगन्तराललक्षण ,,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(1) द्वितीया बहुव्रीहिः = உதாஹரணம்.

1. आरूढवानरः = आरूढः वानरः यं सः (वृक्षः)- ஏறப்பட்ட குரங்கை உடைய (மரம்)

2. प्राप्तोदकम् = प्राप्तं उदकं यं सः - அடையப் பட்ட ஜலத்தை உடைய (கிருமம்)

(2) तृतीया बहुव्रीहिः = உதாஹரணம்.

1. प्राप्तविद्यः = प्राप्ता विद्या येन सः - அடையப் பட்ட வித்யையை உடைய வன்.

2. निर्जितकामः = निर्जितः कामः येन सः ஜயிக்கப் பட்ட விருப்பத்தை உடைய வன்.

(4) चतुर्थी बहुव्रीहिः = உதாஹரணம்.

1. उपनीतभोजनः = उपनीतं भोजनं यस्मै सः - யாருக்கு சாப்பாடு கொண்டு போகப்பட்டதோ அவன்.

2. उपहृतधान्यः = उपहृतं धान्यं यस्मै सः - கொண்டு வரப்பட்ட தான் யத்தை உடையவன்.

(5) पञ्चमी बहुव्रीहिः = உதாஹரணம்.

1. आत्तजलः = आत्तं जलं यस्मात् सः - எதி லிருந்து ஜலம் கொண்டு வரப்பட்டதோ.

2. उद्धृतौदनः = उद्धृतः ओदनः यस्मात् सः - எதிலிருந்து சாதம் எடுக்கப் பட்டதோ.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(6) षष्ठी बहुव्रीहिः = உதாஹரணம்.

1. शुक्लपटः = शुक्लः पटः यस्य सः - எவனுடைய வஸ்திரம் வெண்மையானதோ அவன்.

2. नीलाम्बरः = नील अम्बरं यस्य सः - எவனுடைய வஸ்திரம் கருப்பானதோ அவன்.

(7) सप्तमी बहुव्रीहिः = உதாஹரணம்.

1. वीरपुरुषः = वीराः पुरुषाः यस्मिन् सः - எந்த ஸேனைக் கூட்டத்தில் வீர புருஷர்கள் இருப்பரோ.

2. सञ्चितजलम् = सञ्चितं जलं यस्मिन् - तत् எந்த பாத்திரத்தில் ஜலம் வைக்கப்பட்டதோ.

(8) बहुपद बहुव्रीहिः = உதாஹரணம்.

1. बाहुबलेन निर्जिताः शत्रवः येन सः - புஜபலத்தினால் ஜயிக்கப்பட்ட சத்ருக்களை உடையவன்.

2. पराक्रमोपार्जितसंपत् = पराक्रमेण उपार्जिता संपत् येन सः - பராக்ரமத்தினால் சேர்க்கப்பட்ட ஸம்பத்தை உடையவன்.

(9) संख्योभयपद बहुव्रीहिः = உதாஹரணம்.

1. द्वित्राः = द्वौ वा त्रयो वा - இரண்டு அல்லது மூன்று பேர்கள்,

2. द्विदशाः = द्विरावृत्ताः दश - இரண்டால் பெருக்கின பத்து (இருபது) பேர்கள்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(10) सहपूर्वपद बहुव्रीहिः = உதாஹரணம்.

1. सपुत्रः = पुत्रेण सह वर्तत इति - பிள்ளையுடன் கூடியவன்

2. समूलः = मूलेन सह वर्तत इति - வேருடன் கூடிய (மரம்).

இந்த உதாஹரணங்களில் "सह கூட" என்ற அர்த்தத்தைக் கொடுக்கக்கூடிய 'स' என்ற சொல் பத்திற்கு முன்பு இருப்பதைக் காண்க.

(1) व्यतिहारलक्षण बहुव्रीहिः = உதாஹரணம்.

(1) केशाकेशि = केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं इति - மயிருடன், மயிர் பிடித்துக் கொண்டு இந்த சண்டை ஆரம்பித்தது.

(2) दण्डादण्डि = दण्डैः दण्डैः प्रहृत्य इदं युद्धं प्रवृत्तं इति - தடிகளுடன், தடிகளினால் அடிக்கப்பட்டு இந்த சண்டை ஆரம்பித்தது.

(2) दिगन्तरालक्षण बहुव्रीहिः = உதாஹரணம்.

दक्षिणपूर्वा = दक्षिणस्याः पूर्वस्याश्च दिशोः यत् अन्तरालं सा दक्षिणपूर्वा.

தெற்கிற்கும், கிழக்கிற்கும் நடுவில் உள்ள இடைவெளி எதுவோ அது தக்ஷிணபூர்வா (திக்)

———

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 10.

॥ संस्कृतं नाम दैवीवाक् ॥

विश्वस्य पुरातनतमा भाषा संस्कृतम्। अस्याध्ययनस्य प्रचारस्य च कालोऽयमागतः। इयं भाषा अद्यापि भारते व्यवह्रियते। यद्यपि पुरातनस्वरूपात् भिन्नं स्वरूपं अस्याः वर्तते अद्यत्वे। अस्यां भाषायां भारतीयसंस्कृतेः स्वरूपं निहितमस्ति। उत्तरभारतस्य भाषाणां अध्ययनाय संस्कृतस्य ज्ञानं परं आवश्यकम्। दक्षिणभारतीयभाषासु च संस्कृतशब्दानां प्राबल्यं दरीदृश्यते एव।

पुरा संस्कृतं भारतस्य सांस्कृतिकी भाषा आसीत्। अद्यापि इयमेव भाषा इदं पदं अधिष्ठातुं समर्था। अस्य साहित्यं विशालं सर्वव्यापि च। अस्माकं संस्कृतिः केवलं संस्कृतेनैव ज्ञातुं शक्या। संस्कृतेनैव अस्माकं पुण्यभूमेः महत्सम्मानं पुरा आसीत्। अद्यापि चास्माकं देशः अनेनैव सम्मानभाजनं वर्तते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आङ्ग्लीयैः, जर्मानीयैः, तथा अपरेषां महाद्वीपानां पण्डितैः, अस्या भाषायाः ज्ञानं अधिगतम्। संस्कृतभाषायाः माहात्म्यं तु भारतीयविधाने अपि नीतिविद्भिः स्वीकृतम्। अतः संस्कृतस्याध्ययनाय, पुनरुत्थानाय च द्रुतमेवास्माभिः प्रयत्नो विधेयः।

संस्कृतभाषायामेव सा शक्तिः, या वैदिकीं संस्कृतिं पुनरुज्जीवयितुं क्षमा। वैदिकी संस्कृतिरेव हि विश्वेऽस्मिन् पुनः शान्तिं स्थापयितुं समर्था। वेदान्, शास्त्राणि, उपनिषदः, महाभारतं, रामायणं अन्यानपि धार्मिकान् सांस्कृतिकांश्च ग्रन्थान् सम्यगधिगन्तुं संस्कृतभाषा नितान्तमावश्यकी।

आशासे यद्भारतीयाः गृहे गृहे संस्कृतप्रचाराय प्रयतिष्यन्ते, येनास्माकं पूता संस्कृतभाषा विश्वस्य समक्षं भूयः अपि गौरवास्पदं प्राप्नुयात्।

मदभिप्रायः भवद्भिः शान्त्या आकर्णितः। अतोऽहं हृदयतो धन्यवादान् सर्वेभ्यो ददामि, आशासे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च युष्मासु प्रत्येकमपि सज्जनः निजसांस्कृतिकभाषाया निजे निजे गृहे पूर्णमादरं विधास्यति ।

सुरभारती विजयतेतराम् ।

பதங்கள்.

व्यवह्रियते - வ்யவஹரிக்கப்படுகிறது.

दरीदृश्यते - நன்கு காணப்படுகிறது.

अधिष्ठातुम् - வஹிப்பதற்கு

उज्जीवयितुम् - ஜீவனை உண்டாக்குவதற்கு

अधिगन्तुम् - அறிவதற்கு

नितान्तम् - மிகவும்

प्राप्नुयात् - அடையட்டும்

आकर्णितः - கேட்கப்பட்டது.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 11

॥ द्वन्द्वसमासः ॥

இந்த ஸமாஸத்தில் சேரும் பல பதங்கள் ஒரே மாதிரி முக்கியமானவை. இது 'च' என்ற பதத்தால் விக்ரஹ வாக்யத்தில் விவரிக்கப்படுகிறது.
இதன் இரண்டு பிரிவுகளாவன :—

१. इतरेतरद्वन्द्वः २. समाहारद्वन्द्वः

'एक शेषः' என்ற ஒரு பிரிவு द्वन्द्व ஸமாஸத்தைப் போல் இருக்கும். ஆனால் அதை ஸமாஸம் என்ற பிரிவில் சேர்க்காமல் தனியாக, இதன் லக்ஷணத்தையும், உதாஹரணத்தையும் கீழே தருவோமாக.

(1) **इतरेतरद्वन्द्वसमासः** = உதாஹரணம்.

1. **रामकृष्णौ** = (रामश्च कृष्णश्च) - ராமனும் கிருஷ்ணனும்.

2. **हरिहरगुरवः** = (हरिश्च हरश्च गुरुश्च) - ஹரி ஹரன், குரு ஆக இவர்கள்.

(2) **समाहारद्वन्द्वसमासः**= உதாஹரணம்.

पाणिपादम् = (पाणी च पादौ च) - கையும், காலும்.

2, **शुकबकम्** = (शुकाश्च बकाश्च) - கிளியும், கொக்கும்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकशेषः இரண்டு அல்லது மேற்பட்ட வஸ்துக்களை ஒன்றுகச் சேர்த்து **राम - कृष्ण - मुकुन्दाः** (ராம கிருஷ்ண முகுந்தர்கள்) என்று **द्वन्द्व** ஸமாஸத்தில் சொல்லுகிறோம். ஏக சேஷத்தில் அப்படி வரும் பதங்களில் ஒன்றுதான் மிச்சமாக இருக்கும். இதற்கு இரண்டு பிரிவுகள் உண்டு **सरूपैकशेषः** । **विरूपैकशेषः** என்பதாக.

सरूपैकशेषः = உதாஹரணம்.

वृक्षश्च, वृक्षश्च, वृक्षश्च = वृक्षाः - மரங்கள்.

மேற்கண்ட உதாஹரணத்தில் ஒன்றுக்கு மேற்பட்ட ஒரே மாதிரியான வஸ்துக்களைச் சொல்லும் பதங்கள் ஒன்றுக சேர்ந்துள்ளன. ஒரே மாதிரியுள்ள பதங்களில் ஒன்று மிஞ்சுகிறது. ஆகையால் இது **सरूपैकशेषः** எனப்படுகிறது.

विरूपैकशेषः = உதாஹரணம்.

पिता च माता च पितरौ = தாயும் தந்தையும்.

மேற்கண்ட உதாஹரணத்தில் பிதா, மாதா, என்ற இரண்டு வெவ்வேறு மாதிரியான பதங்கள் ஒன்று சேரும்போது **पिता** என்பது மட்டும் மிஞ்சுகிறது. ஆகையால் இது **विरूपैकशेषः** எனப்படுகிறது.

(**सरूप** - ஒரே மாதிரியான

विरूप - வெவ்வேறு விதமான).

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ द्विगुसमासः ॥

இந்த ஸமாஸம் **संख्या** அதாவது எண்ணிக்கையை சொல்லும் பதத்தை முதலாவதாகக் கொண்டிருக்கும். இது இரண்டு வகைப்பட்டது.

१. **एकवद्भावि द्विगुसमासः**

२. **अनेकवद्भावि द्विगुसमासः**

'ஏகவத் பாவி' என்பது பல எண்ணிக்கை உள்ள ஒரு கூட்டத்தை ஒன்றாக சொல்லுகிறது.

உதாஹரணம் :—

त्रिभुवनम् = त्रयाणाम् भुवनानाम् समाहारः - மூன்று உலகங்களின் சேர்க்கை.

'அநேகவத் பாவி' ஸமாஸத்தில் பல எண்ணிக்கை உள்ள வஸ்துக்கள் சொல்லப்படுகின்றன.

உதாஹரணம் :—

सप्तर्षयः = सप्त च ते ऋषयश्च - ஏழு ரிஷிகள்.

॥ अव्ययीभावसमासः ॥

அவ்யயத்தை முதலாகக்கொண்டது இது.

உதாஹரணம் :—

1. **अनुविष्णु = विष्णोः पश्चात्** - விஷ்ணுவிற்குப் பின்னால்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. उपगङ्गम् = गङ्गायाः समीपे - கங்கையின் பக்கத்தில்.

மேற்கண்ட உதாஹரணங்களில் अनु, उप, என்ற அவ்யயங்கள் முறையே பின்னல், பக்கத்தில், என்ற அர்த்தத்தைக் கொடுக்கின்றன. எந்த வேற்றுமையிலும், எந்த காலத்திலும், மாறுமல் இருக்கும் பதங்களே அவ்யயங்கள் எனப்படுகின்றன.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 12

॥ नलदमयन्तीवर्णनम् ॥

(१) आसीत् राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टैः रूपवानश्वकोविदः ॥

(२) अतिष्ठन्मनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।
उपर्युपरि सर्वेषां आदित्य इव तेजसा ॥

(३) ब्रह्मण्यो वेदवित् शूरः निषधेषु महीपतिः ।
अक्षप्रियः सत्यवादी महानक्षौहिणीपतिः ॥

(४) तथैवासीत् विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्वगुणैर्युक्तः प्रजाकामः स चाप्रजाः ॥

(५) स प्रजार्थे परं यत्नं अकरोत् सुसमाहितः ।
तमभ्यगच्छत् ब्रह्मर्षिः दमनो नाम भारत ॥

(६) तं स भीमः प्रजाकामः तोषयमास धर्मवित् ।
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम् ॥

(७) तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(८) दमयन्ती दमं दान्तं दमनं च सुवर्चसम् ।
उपपन्नान् गुणैस्सर्वैः भीमान् भीमपराक्रमान् ॥

(९) दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥

(१०) तत्र स्म राजते भैमी सर्वाभरणभूषिता ।
सखीमध्येऽनवद्याङ्गी विद्युत्सौदामिनी यथा ॥

பதங்கள்

अश्वकोविदः - குதிரைச் சாஸ்திரம் அறிந்தவன்.

अक्षप्रियः - சூதாட்டத்தில் விருப்பமுள்ளவன்.

अक्षौहिणीपतिः - அக்ஷௌஹிணீ ஸேனைத் தலைவன்.

प्रजाकामः - ஸந்தானத்தை விரும்புகிறவன்.

अप्रजः - ஸந்தானமில்லாதவன்.

अभ्यगच्छत् - வந்து சேர்ந்தான்

तोषयामास - ஸந்தோஷிக்கச் செய்தான்.

महिषी - பட்டத்து ராணி.

सुवर्चसम् - நல்ல தேஜஸ்-உடன் கூடின

प्राप - அடைந்தான்.

अनवद्याङ्गी - குற்றமற்ற அங்கங்களை உடையவள்.

राजते स्म - பிரகாசித்தான்.

सौदामिनी - மின்னல்

उपपन्न - தகுதியான, அடைந்த

महायशाः - புகழுடன் கூடியவர்.

பாடம் பன்ரெண்டில் உள்ள கதையை, ஸம்ஸ்கிருதத்தில் சில வரிகளில் எழுதுக.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 13

॥ किङ्करैः पश्य किं कृतम् ॥

कस्मिंश्चित् वने कश्चन वृकः आसीत्। सः तत्र शश-बिडाल, वानर, शृगाल, बालान् व्यापाद्य अभक्षयत्।

एकदा यतमानोऽपि स वने भक्ष्यं न अलभत। तदा उपोषितः सः क्षुत्क्षामोऽजायत। स भक्ष्यार्थी चन्द्रिकासनाथायां रात्रौ भ्रमन् कस्यचित् कृषकस्य गोष्ठमविशत्। स तत्र पीनं युवानं श्वानमेकं अपश्यत्। तं दृष्ट्वा सः शुष्कस्मितेन दन्तान् प्रदर्श्य विनयेन अनामयं अपृच्छत्। कुशलप्रश्नानन्तरं स वृकः श्वानमवादीत्—भो मित्र! श्वन्! पीनोऽसि; दृढोऽसि; दर्शनीयोऽसि च। वर्धते मे कुतूहलं दृष्ट्वा सर्वाङ्गसुन्दरं त्वाम्। अहं नित्यं प्रयत्नशीलोऽपि न लभे स्वोदरपूरमपि भोजनम्।

एतत् श्रुत्वा सारमेयोऽवदत्—भो वृक! यथाहं करोमि तथैव त्वमपि करोषि चेत् तर्हि सुखी भवि-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष्यसि। नाहं किमपि कठिनं कार्यं करोमि। रात्रौ स्वामिनः गृहचत्वरं अध्यास्य चोरेभ्यस्तस्य भवनं रक्षामि। जागरूकता तु मम स्वभाव एव। नात्र विषये मम जायते परिश्रमः। ततो वृक आह-नैतत्कठिनम्। भो मित्र, योऽहं नित्यं वने भ्रमामि, सहे च सुतरां हिमवातवर्षातपान्, सोहं छायायां तिष्ठन् सरलं कर्म कुर्वाणः स्वोदरपूरं भोजनं सुखेन लभेय चेत् किमन्यत् आशास्यम्।

एवं संभाषमाणयोस्तयोः वृकस्य दृष्टिः शुनकस्य गले अपतत्। स तत्र किणमलक्षयत्। तदा स श्वानमपृच्छत् "अहो सखे, किमिदं ते गले वर्तत इति। श्वाऽऽह—न किञ्चित्। मम स्वामी दिवा मां गले रज्ज्वा बद्ध्वा रक्षति। रात्रो सम्यक् गृहस्य रक्षणं भवेदिति मां मुञ्चति। तदाहं स्वतन्त्रः सर्वतो गृहं स्वैरं भ्रमामि। मम भोजनविषये तु परमं सुखमनुभवाम्यहम्। यदा सर्वे गृहजनाः भुक्त्वा स्वस्वकार्येषु प्रवर्तन्ते तदा गृहदासी सर्वेषामुच्छिष्टं मह्यं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यथेष्टं ददाति। भोजनादुत्थाय प्रायः सर्वमेव रोटिकाशकलं मे ददाति। पात्रेषु शिष्टं भक्तादिकं स्वामिनी मां विना अन्यस्मै न ददाति।

ततः सारमेयः उवाच—भो वयस्य ननु श्रुता त्वया मम गृहसौख्यकथा? अनेन कारणेन अहं सुखी पीनो भवामि। त्वमपि अहमिव यदि करिष्यसि तर्हि सुखं विन्दसे; वनभ्रमणपरिश्रमाच्च मुक्तो भविष्यसि।

इति श्रुत्वा स वृकः विमना इव ततो गन्तुं प्रचक्रमे। तं तथा प्रयान्तं शुनकः आह्वयत्। भो मित्र एह्येहि! किमपसरसि तूष्णीम्?। वृको दूरादेव तं नमस्कृत्य उवाच—नाहं तत् सुखं कामये भोः, तत्तु तवैव अक्षय्यमस्तु। स्वतन्त्रोऽहं कृश एव वरः, न त्वमिव पराधीनः पीनतां कामये। नाहं बन्धनमुपेत्य राजापि भवितुमिच्छामि। स इदमवादीत्—;

सेवया सुखमिच्छद्भिः सेवकैः पश्य किं कृतम्।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम्॥

(बालसंस्कृतम्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பதங்கள்

वृकः - ஓநாய்
व्यापाद्य - கொன்று
भक्ष्यम् - சாப்பிடக்கூடிய வஸ்து.
क्षुत्क्षामः - பசியினால் மெலிந்த வனுய்
अविशत् - நுழைந்தான்.
पीनम् - பருத்த
अनामयम् - ஆரோக்யம்
अवादीत् - சொல்லிற்று.
सहे - பொறுத்துக்கொள்வேன்.
किणम् - தழும்பு
उच्छिष्टम् - ஏச்சில், மிகுதியான
सारमेयः - நாய்
विमनाः - வருத்தமடைந்தவன்
प्रचक्रमे - ஆரம்பித்தான்.
उपेत्य - அடைந்து

பாடம் 14.

॥ जकारन्तः पुंलिङ्गः "राज्" शब्दः ॥

एकवचनं	बहुवचनं	विभक्तिः
राट्, राड्	राजः	प्रथमा
राजम्	राजः	द्वितीया
राजा	राड्भिः	तृतीया
राजे	राड्भ्यः	चतुर्थी
राजः	राड्भ्यः	पञ्चमी
राजः	जाराम्	षष्ठी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजि	राट्सु; राट्त्सु	सप्तमी
राट्; राड्	राजः	सम्बोधनम्

सम्राज्, परिव्राज्, विभ्राज्, विष्, द्विष्, प्रावृष्, लिह्, முதலிய சப்தங்களும் மேற்கண்ட "राज्" சப்தத்தைப்போலவே சொல்லப்படவேண்டியவை.

॥ नकारान्तः पुंलिङ्गः "राजन्" शब्दः ॥

एकवचनम्	बहुवचनम्	विभक्तिः
राजा	राजानः	प्रथमा
राजानं	राज्ञः	द्वितीया
राज्ञा	राजभिः	तृतीया
राज्ञे	राजभ्यः	चतुर्थी
राज्ञः	राजभ्यः	पञ्चमी
राज्ञः	राज्ञाम्	षष्ठी
राज्ञि, राजनि	राजसु	सप्तमी
राजन्	राजानः	सम्बोधनम्

महिमन्, प्रेमन्, लघिमन्, गरिमन्, முதலான சப்தங்களையும் "राजन्" சப்தத்தைப்போலவே சொல்ல வேண்டும்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ तकरान्तः स्त्रीलिङ्गः "सरित्" शब्दः ॥

एकवचनम्	बहुवचनम्	विभक्तिः
सरित्	सरितः	प्रथमा
सरितम्	सरितः	द्वितीया
सरिता	सरिद्भिः	तृतीया
सरिते	सरिद्भ्यः	चतुर्थी
सरितः	सरिद्भ्यः	पञ्चमी
सरितः	सरिताम्	षष्ठी
सरिति	सरित्सु	सप्तमी
सरित्	सरितः	सन्बोधनम्

பாடம் 15.

॥ सुभाषितानि ॥

(१) ते वन्द्याः ते महात्मानः तेषां लोके स्थिरं यशः ।
यैर्निबद्धानि काव्यानि ये वा काव्येषु कीर्तिताः ॥

(२) मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम् ॥

(३) लभेत सिकतासु तैलमपि यत्नतः पीडयन् ।
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(४) गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिः गावः क्षीरविवर्जिताः ॥

(५) गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥

(६) चिन्तनीया हि विपदां आदावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥

(७) भोगा न भुक्ता वयमेव भुक्ताः
तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याताः
तृष्णा न जीर्णा वयमेव जीर्णाः ॥

(८) क्षते प्रहारा निपतन्त्यभीक्ष्णं
धनक्षये वर्धते जाठरोऽग्निः ।
आपत्सु वैराणि समुद्भवन्ति
छिद्रेष्वनर्था बहुलीभवन्ति ॥

(९) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

(१०) द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।
सुभाषितरसं दृष्ट्वा सुधा भीता दिवं गता ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(११) न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनात् प्रधानम् ॥

(१२) नारिकेलसमाकाराः दृश्यन्ते हि सुहृज्जनाः ।
अन्ये बदरिकाकारा बहिरेव मनोहराः ॥

(१३) सज्जनस्य हृदयं नवनीतं
यद्वदन्ति कवयः तदलीकम् ।
अन्यदेहविलसत्-परितापात्
सज्जनो द्रवति नो नवनीतम् ॥

(१४) विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥

(१५) महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥

(१६) कीटोऽपि सुमनः-सङ्गात् आरोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம். 16.

॥ गङ्गा ॥

भारतवर्षस्य उत्तरतः हिमालयो नाम अतितुङ्गः पर्वतः विद्यते। तस्मादेव गङ्गा प्रभवति। ब्रह्मपुत्रा, सिन्धु, यमुना प्रभृतयः नद्यः अपि हिमालयादेव प्रभवन्ति। नदीषु श्रेष्ठतमा गङ्गा नदी। गङ्गेत्रीति अस्याः उद्भवस्थलस्य नाम। तत्र अस्याः प्रवाहः अल्पः वर्तते। पश्चात् क्रमशः एष प्रवाहः विततः भवति

भगीरथेन महत्तपः तप्त्वा एषा स्वर्गात् इहानीता। अत एव एषा भागीरथी इति कथ्यते। अस्याः तोयं पवित्रं मन्यन्ते जनाः। अस्याः तटे बहूनि तीर्थस्थानानि सन्ति। नानादेशात् आगत्य जनाः अस्यां स्नानं कुर्वन्ति। पुण्यपर्वसु प्रतिवर्षं असंख्याकाः जना अत्र आगच्छन्ति। अस्याः माहात्म्यं च वर्णयन्ति।

अतितुङ्गे हिमालयस्य शृङ्गे यत्र यत्र गङ्गायाः तटे तीर्थस्थानानि सन्ति तत्र तत्र तापसाः निवसन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ते च शान्तेन मनसा परमेश्वरं ध्यायन्ति। रुग्णाः अस्याः पयःपानं कृत्वा नीरोगाः जायन्ते। इत्थं मातेव एषा नदी जनानां उपकरोति। अत एव पुराणेषु अस्याः माहात्म्यं उपगीतम्।

गङ्गायाः जलेन कृषीवलानां महोपकारः भवति। ते स्वक्षेत्रेभ्यः पर्याप्तं जलं लभन्ते। इत्थं तत्र धान्यं वैपुल्येन जायते। अस्याः तटे बहूनि समृद्धानि नगराणि सन्ति। तेषां नगराणां समृद्धेः कारणं एषा एव। अस्याः जले नौका अपि सञ्चरन्ति। नौकाभिः वणिजः व्यापारं कुर्वन्ति। एषा भारतीयानां बहूपकारं विदधाति। अतः गङ्गायाः दर्शनं पुण्यमेव।

பதங்கள்

प्रभवति - உண்டாகிறது
विततः - விஸ்தாரமாக
अवतरति - இறங்குகிறது
मन्यन्ते - நினைக்கிறார்கள்
असंख्याकाः - கணக்கற்ற
उपवर्णितम् - வர்ணிக்கப்பட்டது
वैपुल्येन - அதிகமாக
नौका - கப்பல்
सञ्चरन्ति - திரிகின்றனர்
वणिजः - வியாபாரிகள்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 17.

॥ लोकोक्तयः ॥

(१) अवश्यम्भाविनो भावा भवन्ति महतामपि ।

மஹான்களுக்கும், வருவது வந்தே தீரும்.

प्रयोगः—"रामस्यापि भार्या रावणेनाऽपहृता । सत्यमेवेदम् — अवश्यम्भाविनो भावाः भवन्ति महतामपि ॥

(२) अतिप्रवृद्धा शाल्मली वारणस्तम्भो न भवति ।

மிகவும் பருத்த சால்மலி மரம், யானைகட்டும் மரமாக ஆகாது.

प्रयोगः—षण्डोऽयं सेनापतिः कृतः तथापि नायं शत्रोः सेनां वारयितुं प्रभविष्यति । यतः— अतिप्रवृद्धा ..... ॥

(३) अभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ? ॥

நல்லதோ ; கெட்டதோ ; விதிப்படி நடப்பதை யார்தான் தடுக்க முடியும் ?

प्रयोगः—वारत्रयं कृतेऽपि यत्ने न स परीक्षामुत्तीर्णवान् । यतः अभद्रम् ..... ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(४) अस्य पापोदरस्याऽर्थे किमनाटि न नाटकम् ॥

இந்த பாழும் வயிற்றிற்காக எந்த வித நாடகம் தான் நடிக்கவில்லை.

प्रयोग :—दुष्टानामनुवृत्याप्युदरं पूर्यते ; तदस्य पापोदरस्यार्थे । यत :—अस्य पापोदरस्यार्थे ..... ॥

(५) अम्बुनो बिन्दुरल्पोऽपि शुक्तौ मुक्ताफलं भवेत् ।

ஜலத்துளி சிறிதாயினும், முத்துச்சிப்பியில் அது விழும்போது முத்தாக ஆகிறது.

प्रयोगः–संसर्गात् उन्नतिर्जायते । यतः अम्बुनो .... ॥

(६) एकः करोति पापानि फलं भुङ्क्ते महाजनः ।

யாரோ ஒருவன் செய்யும் தப்பிற்காக ஸாதுக்கள் பலரை அனுபவிக்க வேண்டியிருக்கிறது.

प्रयोग :—रावणेन सीतायां हृतायां सागरो बन्धमाप्तवान् । यतः, "एकः करोति ..... ॥

(७) अपेयेषु तडागेषु जलं बहुतरं भवति ।

குடிக்கத்தகாத குளத்தில் ஜலம் அதிகமாக இருக்கிறது.

प्रयोगः—"अपेयेषु ..... ॥

(८) अयमपरः क्षते क्षारावसेकः ।

இது மற்றொரு கஷ்டத்தின் மீது கஷ்டம்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रयोगः--माता मृता, इदानीं भ्राताऽपि दिवं गतः यतः "अयमपरः ..... ॥

(९) अन्तः-पुरगतमापणे घुष्यते।

அந்தப் புரத்தில் நடந்தது கடைத்தெருவில் பேசப்படுகிறது.

प्रयोगः—"अणुरपि दोषः प्रकटीभवति यतः अन्तःपुरगतम् ..... ॥

(१०) अर्थार्थं प्रवर्तते लोकः।

பொருளாசையிலேயே உலகப் போக்கு உள்ளது.

प्रयोगः—अकार्यशतं कृत्वापि धनमर्जितुं सर्वस्य मतिर्भवति यतः —अर्थार्थं ..... ॥

(११) असहायः पथि न गच्छेत् ॥

துணையில்லாமல் தனி வழியே செல்லாதே!

प्रयोगः—तं स्तेनाः मार्गं अलुण्ठन्। सत्यमुक्तम्— असहायः पथि न गच्छेत् .....

(१२) अल्पानामपि वस्तुनां संहतिः कार्यसाधिका ॥

சிறு வஸ்த்துக்களும் ஒன்று சேர்ந்தால் காரியத்தை ஸாதிக்க முடியும், (சிறு துளி பெரு வெள்ளம்)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रयोगः—तृणैः न बध्यते हस्ती; स तु रज्वा बध्यते ॥

(१३) गुणवद्वस्तुसंसर्गात् याति स्वल्पोऽपि गौरवम् ॥

குணமுள்ள வஸ்துவின் சேர்க்கையினால், ஸாமான்யமானவனும் கௌரவத்தை அடைகிறான்.

प्रयोगः—पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते, यतः गुणवद्वस्तु.....।

(१४) अभितप्तम् अयोऽपि मार्दवं भजते । कैव कथा शरीरिणाम् ॥

"நன்கு காய்ச்சப்பட்ட இரும்பும், மிருதுவாக ஆகிறதென்றால், சாதாரண மனிதரைப்பற்றி கேட்கவா வேண்டும்."

प्रयोगः—शोकाभिभूतः स धीमान् अपि रोदितुं प्रावर्तत— यतः "अभितप्तं..... ॥

(१५) अतिमात्रोपहासस्तु कलहाय प्रकल्पते ।

அதிகமாகப் பரிஹஸித்தல் சண்டையில் முடியும்.

प्रयोगः—सर्वं समर्यादं शोभनम्; यतः—अतिमात्रोपहासस्तु..... ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ परिशिष्टम् ॥

(सर्व = पुंलिङ्गः)

एकवचनं	द्विवचनं	बहुवचनं	
सर्वः	सर्वौ	सर्वे	प्रथमा
सर्वम्	सर्वौ	सर्वान्	द्वितीया
सर्वेण	सर्वाभ्यां	सर्वैः	तृतीया
सर्वस्मै	सर्वाभ्यां	सर्वेभ्यः	चतुर्थी
सर्वस्मात्	सर्वाभ्यां	सर्वेभ्यः	पञ्चमी
सर्वस्य	सर्वयोः	सर्वेषां	षष्ठी
सर्वस्मिन्	सर्वयोः	सर्वेषु	सप्तमी
सर्व	सर्वौ	सर्वे	सम्बोधनम्

(सर्व स्त्रीलिङ्गः)

एकवचनं	द्विवचनं	बहुवचनं
सर्वा	सर्वे	सर्वाः
सर्वाम्	सर्वे	सर्वाः
सर्वया	सर्वाभ्यां	सर्वाभिः
सर्वस्यै	सर्वाभ्यां	सर्वाभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकवचनं	द्विवचनं	बहुवचनं
सर्वस्याः	सर्वाभ्यां	सर्वाभ्यः
सर्वस्याः	सर्वयोः	सर्वासाम्
सर्वस्यां	सर्वयोः	सर्वासु
सर्वे	सर्वे	सर्वाः

(सर्व नपुंसकलिङ्गः)

सर्वं	सर्वे	सर्वाणि
सर्वं	सर्वे	सर्वाणि
सर्वेण	सर्वाभ्यां	सर्वैः
सर्वस्मै	सर्वाभ्यां	सर्वेभ्यः
सर्वस्मात्	सर्वाभ्यां	सर्वेभ्यः
सर्वस्य	सर्वयोः	सर्वेषाम्
सर्वस्मिन्	सर्वयोः	सर्वेषु
सर्व	सर्वे	सर्वाणि

(वाच् स्त्रीलिङ्गः)

एकवचनं	द्विवचनं	बहुवचनं
वाक्, वाग्	वाचौ	वाचः
वाचं	वाचौ	वाचः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकवचनं	द्विवचनं	बहुवचनं
वाचा	वाग्भ्यां	वाग्भिः
वाचे	वाग्भ्यां	वाग्भ्यः
वाचः	वाग्भ्यां	वाग्भ्यः
वाचः	वाचोः	वाचाम्
वाचि	वाचोः	वाक्षु
वाक्, वाग्	वाचौ	वाचः

(गो स्त्रीलिङ्गः)

गौः	गावौ	गावः
गाम्	गावौ	गाः
गवा	गोभ्यां	गोभिः
गवे	गोभ्यां	गोभ्यः
गोः	गोभ्यां	गोभ्यः
गोः	गवोः	गवाम्
गवि	गवि	गोषु
गौः	गावौ	गावः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राज् (पुल्लिङ्गः)

एकवचनं	द्विवचनं	बहुवचनं
राट्, राड्	राजौ	राजः
राजं	राजौ	राजः
राजा	राड्भ्यां	राड्भिः
राजे	राड्भ्यां	राड्भ्यः
राजः	राड्भ्यां	राड्भ्यः
राजः	राजोः	राजाम्
राजि	राजोः	राट्सु, राट्त्सु
राट्, राड्	राजौ	राजः

राजन् (पुल्लिङ्गः)

एकवचनं	द्विवचनं	बहुवचनं
राजा	राजानौ	राजानः
राजानम्	राजानौ	राज्ञः
राज्ञा	राजभ्यां	राजभिः
राज्ञे	राजभ्यां	राजभ्यः
राज्ञः	राजभ्यां	राजभ्यः
राज्ञः	राज्ञोः	राज्ञाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकवचनं	द्विवचनं	बहुवचनं
राज्ञि, राजनि	राज्ञोः	राजसु
राजन्	राजानौ	राजानः

सरित् (स्त्रीलिङ्गः)

एकवचनं	द्विवचनं	बहुवचनं
सरित्	सरितौ	सरितः
सरितम्	सरितौ	सरितः
सरिता	सरिद्भ्यां	सरिद्भिः
सरिते	सरिद्भ्यां	सरिद्भ्यः
सरितः	सरिद्भ्यां	सरिद्भ्यः
सरितः	सरितोः	सरिताम्
सरिति	सरितोः	सरित्सु
सरित्	सरितौ	सरितः

॥ समासचक्रम् ॥

तत्पुरुष समासः - கடைசீ பதத்தை முக்யமாக உடையது.

कर्मधारय ,, - ,,

बहुव्रीहि ,, - அன்ய பதார்த்தத்தை முக்யமாக உடையது

द्वन्द्व ,, - இரண்டு பதங்களும் முக்யமானது,

द्विगु ,, - ஸங்க்யையை முதலாகக் கொண்டது,

अव्ययीभाव ,, - அவ்யயத்தை முதலாகக் கொண்டது.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.